योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०२६

अज्ञातलेखकः

निर्वाणप्रकरणस्य पूर्वार्धम्

सर्गः १

सर्गः २

सर्गः ३

सर्गः ४

सर्गः ५

सर्गः ६

सर्गः ७

सर्गः ८

सर्गः ९

सर्गः १०

सर्गः ११

सर्गः १२

सर्गः १३

सर्गः १४

सर्गः १५

सर्गः १६

सर्गः १७

सर्गः १८

सर्गः १९

सर्गः २०

सर्गः २१

सर्गः २२

सर्गः २३

सर्गः २४

सर्गः २५

सर्गः ६५

सर्गः ६६

सर्गः ६७

सर्गः ६८

सर्गः ६९

सर्गः ७०

सर्गः ७१

सर्गः ७२

सर्गः ७३

सर्गः ७४

सर्गः ७५

सर्गः ७६

सर्गः ७७

सर्गः ७८

सर्गः ७९

सर्गः ८०

सर्गः ८१

सर्गः ८२

सर्गः ८३

सर्गः ८४

सर्गः ८५

सर्गः ८६

सर्गः ८७

सर्गः ८८

सर्गः ८९

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३
सर्गः ९४
सर्गः ९५
सर्गः ९६
सर्गः ९७
सर्गः ९८
सर्गः ९९
सर्गः १००
सर्गः १०१
सर्गः १०२
सर्गः १०३
सर्गः १०४
सर्गः १०५
सर्गः १०६
सर्गः १०७
सर्गः १०८
सर्गः १०९
सर्गः ११०
सर्गः १११
सर्गः ११२
सर्गः ११३
सर्गः ११४
सर्गः ११५

सर्गः ५२ सर्गः ११६

सर्गः ५३ सर्गः ११७

सर्गः ५४ सर्गः ११८

सर्गः ५५ सर्गः ११९

सर्गः ५६ सर्गः १२०

सर्गः ५७ सर्गः १२१

सर्गः ५८ सर्गः १२२

सर्गः ५९ सर्गः १२३

सर्गः ६० सर्गः १२४

सर्गः ६१ सर्गः १२५

सर्गः ६२ सर्गः १२६

सर्गः ६३ सर्गः १२७

सर्गः ६४ सर्गः १२८

षड्विंशः सर्गः २६

भुशुण्ड उवाच ।

एषा हि चित्तविश्रान्तिर्मया प्राणसमाधिना ।

क्रमेणानेन संप्राप्ता स्वयमात्मनि निर्मले ।। १

एतां दृष्टिमवष्टभ्य संस्थितोऽस्मि महामुने ।

न चलामि निमेषांशमपि मेरुविचालतः ।। २

गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा ।

स्वप्नेऽपि न चलत्येष सुसमाधिर्ममात्मनि ।। ३

नित्यानित्यासु लोलासु जगत्स्थितिषु सुस्थितः ।

अन्तर्मुखोऽस्मि तिष्ठामि स्वकामेनात्मनात्मनि ।। ४

अपि संरुध्यते वायुरपि वा सलिलं गतेः ।
नैतस्मात्सुसमाधानाद्विरुद्धं संस्मराम्यहम् ।। ५
प्राणापानानुसरणात्परमात्मावलोकनात् ।
अशोकमनुजातोऽस्मि पदमाद्यं महातपः ।। ५
आमहाप्रलयाद्ब्रह्मन्नुन्मज्जननिमज्जनम् ।
अहमद्यापि भूतानां पश्यञ्जीवामि धीरधीः ।। ७
न भूतं न भविष्यं च चिन्तयामि कदाचन ।
दृष्टिमालम्ब्य तिष्ठामि वर्तमानामिहात्मना ।। ८
यथा प्राप्तेषु कार्येषु परित्यक्तफलैषणः ।
सुषुप्तसमया बुद्ध्या परितिष्ठामि केवलम् ।। ९
भावाभावमयीं चिन्तामीहितानीहितान्विताम् ।
विमृश्यात्मनि तिष्ठामि चिरं जीवाम्यनामयः ।। 6.1.26.१०
प्राणापानसमायोगसमयं समनुस्मरन् ।
स्वयमात्मनि तुष्यामि चिरं जीवाम्यनामयः ।। ११
इदमद्य मया लब्धमिदं प्राप्स्यामि सुन्दरम् ।
इति चिन्ता न मे तेन चिरं जीवाम्यनामयः ।। १२
न स्तौमि न च निन्दामि क्वचित्किंचित्कदाचन ।
आत्मनोऽन्यस्य वा साधो तेनाहं शुभमागतः ।। १३
न तुष्यति शुभप्राप्तौ नाशुभेष्वपि खिद्यते ।
मनो मम समं नित्यं तेनाहं शुभमागतः ।। १४
परमं त्यागमालम्ब्य सर्वमेव सदैव हि ।
जीवितादि मया त्यक्तं तेनाहं शुभमागतः ।। १५
प्रशान्तचापलं वीतशोकं स्वस्थं समाहितम् ।
मनो मम मुने शान्तं तेन जीवाम्यनामयः ।। १६
काष्ठं विलासिनीं शैलं तृणमग्निं हिमं नभः ।
समं सर्वत्र पश्यामि तेन जीवाम्यनामयः ।। १७

किमद्य मम संपन्नं प्रातर्वा भविता पुनः ।

इति चिन्ताज्वरो नास्ति तेन जीवाम्यनामयः ।। १८

जरामरणदुःखेषु राज्यलाभसुखेषु च ।

न बिभेमि न हृष्यामि तेन जीवाम्यनामयः ।। १९

अयं बन्धुः परश्चायं ममायमयमन्यतः ।

इति ब्रह्मन्न जानामि तेन जीवाम्यनामयः ।। 6.1.26.२०

सर्वं सर्वपदाभासमनाद्यन्तमनामयम् ।

अहं चिदिति जानामि तेन जीवाम्यनामयः ।। २१

आहरन्विहरंस्तिष्ठन्नत्तिष्ठन्नुच्छ्वसन्स्वपन् ।

देहोऽहमिति नो वेद्मि तेनास्मि चिरजीवितः ।। २२

इमं सांसारमारम्भं सुषुप्तपदवत्स्थितः ।

असन्तमिव जानामि तेन जीवाम्यनामयः ।। २३

यथाकालमुपायातावर्थानर्थौ समौ मम ।

हस्ताविव शरीरस्थौ तेन जीवाम्यनामयः ।। २४

अपरिचलया शक्त्या सुदृशा स्निग्धमुग्धया ।

ऋजु पश्यामि सर्वत्र तेन जीवाम्यनामयः ।। २५

आपादमस्तकान्तेऽस्मिन्न देहे ममता मम ।

त्यक्ताहंकारपङ्कस्य तेन जीवाम्यनामयः ।। २६

यत्करोमि यदश्नामि तत्त्यक्त्वा तद्गतोऽपि मे ।

मनो नैष्कर्म्यमादत्ते तेन जीवाम्यनामयः ।। २७

यदा यदा मुने किंचिद्विजानामि तदा तदा ।

मतिरायाति नौद्धत्यं तेन जीवाम्यनामयः ।। २८

करोमीशोऽपि नाक्रान्तिं परितापे न खेदवान् ।

दरिद्रोऽपि न वाञ्छामि तेन जीवाम्यनामयः ।। २९

पश्यद्रूपे शरीरेऽस्मिन्भूतस्थात्मा चिदास्पदः ।

भूतवृन्दमहं साम्यात्तेन जीवाम्यनामयः ।। 6.1.26.३०

आशापाशविनुन्नायाश्चित्तवृत्तेः समाहितः ।

संस्पर्शे न ददाम्यन्तस्तेन जीवाम्यनामयः ।। ३१

असत्तां जगतः सत्तामात्मनः करबिल्ववत् ।

सुप्तः प्रबुद्धः पश्यामि तेनास्मि चिरजीवितः ।। ३२

जीर्णं भिन्नं श्लथं क्षीणं क्षुब्धं क्षुण्णं क्षयं गतम् ।

पश्यामि नववत्सर्वं तेन जीवाम्यनामयः ।। ३३

सुखितोऽस्मि सुखापन्ने दुःखितो दुःखिते जने ।

सर्वस्य प्रियमित्रं च तेन जीवाम्यनामयः ।। ३४

आपद्यचलधीरोऽस्मि जगन्मित्रं च संपदि ।

भावाभावेषु नैवास्मि तेन जीवाम्यनामयः ।। ३५

नाहमस्मि न चान्यो मे नाहमन्यस्य कस्यचित् ।

इति मे भावितं चित्तं तेन जीवाम्यनामयः ।। ३६

अहं जगदहं व्योम देशकालक्रमावहम् ।

अहं क्रियेति मे बुद्धिस्तेन जीवाम्यनामयः ।। ३७

घटश्चिच्चित्पटश्चित्खं चिद्घनं शकटं च चित् ।

चित्सर्वमिति मे भावस्तेन जीवाम्यनामयः ।। ३८

इत्यहं मुनिशार्दूल त्रिलोककमलालिकः ।

भुशुण्डो नाम काकोलः कथितश्चिरजीवितः ।। ३९

ब्रह्मार्णवे विलुलितं त्रिजगत्तरङ्गमुत्पादनाद्यभिभवेन विभिन्नरूपम् ।

आलीनमुन्नमितमाकुलदृश्यदृश्यमालोकयन्प्रकलयंश्च चिरं स्थितोऽस्मि ।। 6.1.26.४०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० भुशुं० चिरजीवितहेतुकथनं नाम षड्विंशः सर्गः ।।२६ ।।